# संस्कृत वार्ता:

**दिनाङ्क :-27.11.2024** **प्रात: - 06:55**

## अथ वार्ता:

### संविधान दिवस:

अङ्गीकृतस्य संविधानस्य ह्य: पञ्चसप्तातितम: वार्षिकसम्पूर्तिदिवस: आमानित:। प्रशासनेन अत्रावसरे अद्यारभ्य एकवर्षपर्यन्तं प्रचल्यमानस्य समारोहस्य प्रारम्भ: कृत:। अवधेयं वर्तते यत् संविधानसभया नवचत्वारिंशदधिक-नवदश-शततमे वर्षे नवम्बरमासस्य षड्विंशे दिनाङ्के संविधानं अङ्गीकृतम् तत्पश्चात् पञ्चाशदधिक-नवदश-शततमे वर्षे जनवरीमासस्य षड्विंशे दिनाङ्के क्रियान्वितं जातम्। अत्रावसरे राष्ट्रपति: द्रौपदीमुर्मु: संविधान-सदनस्य केन्द्रीयकक्षे आयोजितं एकं भव्यं कार्यक्रमं सम्बोधितवती यत् भारतीय-संविधानं एकं जीवितं प्रगतिशीलं च ग्रन्थरत्नं वर्तते। यस्य माध्यमेन भारतदेशेन सामाजिकन्याय-समावेशि-विकासयो: लक्ष्या: प्राप्ता:। एतदनन्तरं राष्ट्रपति: जनै: आग्रहं कृतवती यत्ते सांवैधानिक-आदर्शानाम् अनुपालनं कुर्यु: इति। राष्ट्रपति: अग्रे अवदत् यत् भारतीय-संविधानस्य प्रस्तावनायां न्याय-स्वतन्त्रता-समानता-बन्धुत्वानाम् आदर्शा: समङ्किता:। स्वकीये सम्बोधने राष्ट्रपति: पञ्चदश महिला-सदस्यानां योगदानमपि स्मृतवती। एतासां महिलानां संविधानसभायां महत्वपूर्ण-भूमिका: आसन्।

कार्यक्रमस्य वेलायां राष्ट्रपति: एकस्या: स्मारक-मुद्राया: एकस्या: प्रैष्य-चिटिकाया: च अनावरणं कृतवती। अस्मिन् संविधान-दिवसावसरे प्रधानमन्त्री नरेन्द्रमोदी केन्द्रीयमन्त्रिण: विपक्ष-दलस्य नेतार: अन्ये च जना: सम्मिलिता: अभवन्। प्रधानमन्त्री अस्मिन् अवसरे समेभ्य: नागरिकेभ्य: शुभकामना: प्रदत्तवान्। उक्तवान् च यत् संविधानं राष्ट्रस्य मार्गदर्शकत्वेन अस्ति। अवधेयं वर्तते यत् ह्य: संविधान-दिवसस्य पञ्चसप्ततितमे वर्ष-अवसरे राष्ट्रपति: द्रौपदीमुर्मु: संस्कृतभाषायां अनूदितां संविधानप्रतिं विमोचितवती।

### प्रधानमन्त्री-सर्वोच्चन्यायालय:

राष्ट्रसुरक्षायां कस्यापि समाव्हानस्य आतङ्कवादीसङ्गठनस्य कृते समुचितप्रतिक्रियां दातुं भारतस्य संकल्प: प्रधानमन्त्रिणा नरेन्द्रमोदिना प्रतिपादित: । गतसायं सर्वोच्चन्यायालये श्रीमोदी संविधानदिवसस्य एकं उत्सवं सम्बोधयन् आसीत्। प्रधानमन्त्रिणा उक्तं यत् संविधानं देशस्य प्रत्येकं अपेक्षां आवश्यकतां च पूरयति, नागरिकानां कृते मार्गदर्शकत्वेन च कार्यं करोति। श्रीमोदिना प्रतिपादितं यत् संविधानेन एव जम्मू-कश्मीरे तस्य पूर्णतया कार्यान्वयनम् अभवत्।

अस्मिन् अवसरे प्रधानमन्त्रिणा भारतीयन्यायपालिकायाः त्रयो विंशत्यधिक द्विसहस्र-चतुर्विंशत्यधिक द्विसहस्र तम वर्षयोः वार्षिकप्रतिवेदनमपि प्रकाशितम्। केन्द्रीयविधिन्यायमन्त्री अर्जुनराममेघवालः अवदत्, भारतीयसंविधानं भारतस्य एकतायाः, अखण्डतायाः, विकासस्य च मौलिकं आधारमस्ति। भारतस्य मुख्यन्यायाधीशः संजीव खन्ना: अवदत् यत् अद्य राष्ट्रं एतस्य ऐतिहासिकस्य अवसरस्य सम्मानं करोति।

### भारत-बांगलादेश/अल्पसंख्यका:

भारतेन बाङ्गलादेशस्य अधिकारिभी: आग्रहः कृतः यत् ते हिन्दुनां सर्वेषां अल्पसंख्याकानां च सुरक्षां सुनिश्चितं कुर्वन्तु इति यत्र तेषां शान्तिपूर्णसमागमस्य अभिव्यक्ति- स्वातन्त्र्यस्य च अधिकारः अपि सम्मिलित : अस्ति। एकस्मिन् वक्तव्ये विदेशमन्त्रालयेन उक्तं यत्, बाङ्गलासमितिसनातनस्य प्रवक्तुः सनातनजागरणजोटे इत्यस्य चिन्मयकृष्णदासस्य निगड़नस्य मुक्ते: अस्वीकारं च गभीरचिन्तापूर्वकं टिप्पणीकृतम्। तत्र उक्तं यत्, एषा घटना बाङ्गलादेशे अतिवादीनां तत्त्वानां हिन्दुजनेषु अन्येषु अल्पसंख्यकेषु च उपरि बहुविधाक्रमणानां अनन्तरं भवति।

### निर्वाचनायोग:

निर्वाचनायोगेन ह्यः राज्यसभायाः षट् रिक्तासनानां कृते उपनिर्वाचनानां कृते घोषणा कृता। आन्ध्रप्रदेशस्य त्रीणि आसनानि, ओडिशा, पश्चिमबङ्ग, हरियाणा राज्यानां च एकैकं आसनानि सन्ति।

### सैयदमोदीप्रतियोगिता:

लखनऊनगरे ह्यः आरब्धायां चतुर्विंशत्यधिक द्विसहस्र तम वर्षस्य सैयदमोदी अन्ताराष्ट्रीय बैडमिण्टनप्रतियोगितायां पी.वी.सिन्धुः लक्ष्यसेनः च क्रीडायां शीर्षस्थाने भविष्यतः।

॥इति वार्ता:॥